International Journal of Sanskrit Research 2019; 5(2): 89-90

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(2): 89-90
© 2019 IJSR
www.anantaajournal.com
Received: 18-01-2019
Accepted: 19-02-2019

**Sarita Kumari**
TGT Sanskrit, SKV Samalka, New Delhi, India

**Correspondence**
**Sarita Kumari**
TGT Sanskrit, SKV Samalka, New Delhi, India

# वेदेषु आर्थिक सुदृढ़ता तथा वर्तमान परिप्रेक्ष्ये आर्थिकवैषम्यम्ः

**Sarita Kumari**

**प्रस्तावना**

आर्थिकवैषम्यम् वर्तमान समाजस्य अन्या ह्येका विभीषिका। आर्थिकवैषम्यकारणात् समाजे एको वर्गः अन्यवर्गतः प्रतारितोऽस्ति। अस्माभिः दृश्यते यत् ये खलु धनाढयजनाः ते क्रमशः अधिकधनवन्तः जाताः। परन्तु ये दरिद्रः ते ततोऽपि निर्धनिकाः सञ्जाताः। एतत्सर्वं आढवयवैः शोषितवर्गाणामुपरि कृतस्य शोषणस्य परिणामः इति चिन्तकानां मतम्। तेन कारणेन समाजस्योन्नतिः न समभावेन जाता। अधुना केवलं छलेन बलेन कौशलेन धनसंग्रह एव मानवजीवनस्य लक्ष्यं जातम्। 'धनेभ्यो परो बान्धवो नास्ति लोके' इति मन्यन्ते केचन। फलतःपरस्परविदारणे हनने न तत्र भीतिः लज्जा व दृश्यते। तस्मादद्य धरित्रयां 'मानवता' समाप्तप्राया इति लक्ष्यते।

वैदिकसमाजोऽपि धनस्य कामनां करोति स्म। परन्तु तद्धनमद्यतनवत् कलङ्तिं नासीत्–' अग्निना रयिमश्नवत् पोषमेव दिवे दिवे। यशसं वीरवत्तमम्1 'इति। अत्राशयः– न्यायेन परिश्रमेण चार्जितं धनमेव स्थैर्यं यशोयुक्तञ्च भवाति। वर्तमानसमाजे धनविषये तादृशस्य चिन्तनस्यावकास एव नावलोक्यते।

जीवनयापनार्थं धनस्य महत्त्वोपरि तस्योपार्जनविषये च वैदिकर्षीणाम् उच्चारणासीत्। ऐश्वर्यलाभाय आवश्कतत्त्वेषु मूलमस्ति सन्तोषः। वेद आदिशति यदस्माभिः ययदुपार्जितं तत्रैव सन्तुष्टो भवितव्यः भवतु तत स्वल्पम् अधिकं वा– 'वित्ते रमस्व बहुमन्यमानः2 'इति। अद्य सर्वत्रैवासन्तोष एव दरीदृश्यते। धनाढयोऽपि स्वधनेन सन्तुष्टो नास्ति। यस्मात् यसेन केनापि प्रकोरण अधिकोपार्जनार्थम् उद्यतोऽस्ति। सम्पूर्णविश्वस्य एषा स्थितिः परिलक्ष्यते।

वैदिकसमाजः धनैवर्यादिप्राप्तये सततं प्रयतते स्त, किन्तु तद् सर्वथा परिश्रमपूर्वकमेव आसीत्। विना श्रमेण प्राप्तं धनम् अपवित्रत्वेन स्वीकृतम् अक्षादिभ्योऽर्जितस्य। धनस्य महत्वं नासीत्। तस्मात् प्रोक्तं यत् कृषि –वाणिज्यादिभिः परिश्रमपूर्वकम् अर्थोपार्जनं कृत भौतिकोन्नत्यै प्रचेष्टा कार्या–

'अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सावितायमर्यः3 'इति।

तथैव त्यागपूर्वकं भोगकर्तव्यम्–'तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनमि4 'ति वैदिकमूलसन्देशः। अद्यतन समाजो यदि वैदिकादर्श स्वीकारोति तर्हि निश्ख्येन अनियन्त्रितविलासजीवनस्य परिशोधनं भविष्यति। यतो हि श्रमार्जितधनस्य अनुचितकार्येषु अपव्ययकर्तुं सरलतया उद्यतो न भवमि नरः।

धनलाभार्थं सुमार्गमवलम्बनार्थं वैदिकर्षीणाद्गारः यथा– 'अग्ने नय सुपथा राये अस्मान्5 'इति। अर्थप्राप्तये सुपन्था अनुकरणीय इति भावः। वेदस्य कथनगिदं सम्यक् प्रतिभाति यत् धनं तदस्ति यत् सवस्यास्ति, अन्येभ्यः ऋणप्राप्तं धनमपर्याप्तं भवति। तस्मात् स्वपार्श्वे वर्तितं धनमत्र प्रकाम्यते– 'परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम6 'इति पुनरपि प्रोक्तं यत् वित्तशालिनः जनाः दीनेभ्यः अर्थदानेन सुप्रसन्नं कुर्युः– 'पृणीयादिन्नाधमानाय तव्यान्7 'इति।

अन्नदानं महद्यानम्। तद् औदार्येण सम्पादनीयम्। न केवलं स्वस्वार्थे पाकः कर्तव्यः। तथा क्रियते चेत् तन्न पाककर्म, अपितु पापकर्म भवेदिति वेदस्योद्धोषः–

'मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी8 'इति।

ऋग्वेदे न केवलं धनायाचना एव कृता, अपि च समाजे अनुचितरीत्या धनसंग्रहकर्तृभ्यः धनमादाय अभावग्रस्तेभ्यः वितरणस्यापि व्यवस्था कल्पिता– 'इन्द्रो अस्मश्रयं शिक्षतु वि भजा भूरि ते वसु भक्षीय तव राघस9 'इति। पुनश्यच प्रार्थितं यत् अदातृणां गुप्तणधनमादाय हीनजनेभ्यः प्रयच्छतु इति–

'अन्तर्हि ख्यो जनानामर्यो वेदो अदाशुषां तेषां नो वेद आ भर 10 'इति। एवं धनवितरणव्यवस्थादिभिः साम्वादस्य सन्देशः प्रचारितः। तस्मात् वैदिकसाम्यवादानुकरणेन साम्प्रतिकीमार्थिकवैश्यम्यतां निवारयितुं शक्यते इति प्रतीयते।

**सन्दर्भ**


1. ऋ. 1/1/3
2. ऋ. 10/31/13
3. ऋ. 10/31/13
4. ईशा. 1
5. ऋ. 1/181/1
6. ऋ. 7/4/7
7. ऋ. 10/117/4
8. ऋ. 10/117/6
9. ऋ. 1/81/6
10. ऋ. 1/81/1